DOIs:10.2018/SS/202604009 --:-- Research Paper / Article / Review

# वैदिकसाहित्ये स्वराणां महत्त्वम्

**Arupananda Dash**
Ph.D. Research Scholar in Sanskrit,
Department of Sanskrit, Central University of Odisha, Koraput, India.
Email - arupananda772@gmail.com

**शोधसारः** वैदिकवाङ्गयाकाशे वेदाङ्गानां महत्वं सर्वोपरिः वर्तते। अस्माङ्कं वैदिकसाहित्य-जगति षड्वेदाङ्गानि सन्ति। तानि वेदाङ्गानि वेदपुरुषस्य अङ्गरुपेण परुकल्पितमस्ति इति। तेषु वेदाङ्गेषु शिक्षा वेदाङ्गं भवति अन्यतमम्। अतः शिक्षाग्रन्थेषु प्रमुखपाणिनीयशिक्षायां कथितमस्ति ***"शिक्षा घ्राणं तु वेदस्य"*** [1] इति। अस्य शिक्षावेदाङ्गस्य अङ्गवत् पुनः वर्ण-स्वर-मात्रा-वल-साम-मन्तानादिविलसन्ति। तेषु स्वरः भवति अन्यतमः सर्वोत्कृष्टश्च। वैदिकवाङ्गये स्वरनियमाः केवलवर्णोच्चारणं शैलीं न प्रदर्शयति, अपितु सः अर्थस्य आधारशिला वर्तते। उदात्त-अनुदात्त-स्वरित-भेदेन त्रयः स्वराः वैदिकमन्त्रेषु वैदिकवाङ्गयेषु शब्दशक्तिं संरक्षयन्ति। अतादृशि पाणिनीयशिक्षायां उल्लिखितमस्ति- ***"उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः"*** [2] इति। अर्थभेदकत्वे स्वराणाम् अद्वितीयं स्थानम् अस्ति। यतः स्वराघातस्य अल्पदोषोऽपि अभीष्ट-फलस्य स्थाने विपरीतफलं जनयितुं शक्नोति। प्रातिशाख्यादिग्रन्थाः स्वराणां शुद्धोच्चारणस्य नियमान् सुदृढं कुर्वन्ति इति। अतः वैदिकस्वराः मन्त्रणां सार्थकतार्थम् अभिष्टफलप्राप्यर्थम् आनुष्ठानिकानां पूर्तये च अपरिहार्याः गुरुत्वपुर्णाः च सन्ति।

## 1. प्रस्तावना

भारतीयज्ञानपरम्परायां वेदाः केवलं धर्मग्रन्थाः इति न, अपितु सम्पूर्णज्ञानस्य मूलस्रोताः भवन्ति। वैदिकसंस्कृते मन्त्राणामुच्चारणार्थं स्वराणाम् उपयोगः नैकेषु प्रतिशाख्यग्रन्थेषु उल्लिखितोऽस्ति। 'स्वरो वर्णो वा, तेन वेदितव्यः' इति शिक्षाशास्त्रस्य सिद्धान्तः भवति इति। यदि मन्त्रोच्चारणे स्वरदोषाः भवन्ति तर्हि तदैव मन्त्रः इष्टफलं न ददाति। तद्तु अनभिष्टफलं प्रयच्छति एवं कदाचित् यजमानस्य नाशमपि कर्तुं शक्नोति इति अस्माकं शास्त्रे उल्लिखितोऽस्ति। अस्माकं वेदानां रक्षार्थं षड्वेदाङ्गानि मुनिभिः परिकल्पितम्। तस्मिन् वेदाङ्गे अस्य वैदिकस्वराणां महत्वं प्रतिपादितमस्ति। वैदिकसाहित्ये उदात्त-अनुदात्त-स्वरित-भेदेन त्रयः स्वराः सुविन्यस्तरस्ति इति। अतः अस्मिन् शोधप्रपत्रे ***"वैदिकसाहित्ये स्वराणां महत्त्वम्"*** इति शिर्षकान्वीतं शोधप्रपत्रम् अग्रे मया परिशिलयिष्यते।

## 2. स्वरत्रयस्य संक्षिप्त-परिचयः

मन्त्राणामुउच्चारण भेदेन उदात्त-अनुदात्त-स्वरिताः इति त्रयः स्वराः भवन्ति। तेषां स्वराणां सामान्यसंक्षिप्तपरिचयः अतादृशि भवितुमर्हति-

- उदात्तः: तीव्रः (उच्चः) प्रयत्नः।
- अनुदात्तः: मन्दः (नीचः) प्रयत्नः।
- स्वरितः: उदात्तस्य अनुदात्तस्य च योगरूपः, प्रायः आक्षेपरूपः यत्र पूर्वांशः उदात्तः, उत्तरांशश्च अनुदात्तः भवति इति।

अस्मिन् शोधप्रपत्रे एतेषां त्रयः स्वराणाम् अर्थनिर्धारणे, ध्वनिसंरक्षणे, आध्यात्मिकफलप्राप्तौ च कीदृशं महत्त्वपूर्णं योगदानमस्ति तस्य विश्लेषमं अग्रे कुर्मः।

## 3. साहित्यसमीक्षा

संस्कृतवाङ्गये वैदिकस्वराघातस्य संरक्षणार्थं भारतीय-मनीषिभिः कृताः प्रयत्नाः अत्यन्तसावलीलः सुसंगठितश्च भवति। वैदिकस्वराणां महत्वम् अवबोधनार्थं वयं कतिपयः स्रोताणाम् अनुशीलनं कर्तुं शक्यते। तेषु त्रयः प्रमुखाः स्रोताः सन्तिः अतादृशि-

- **पाणिनिय व्याकरणम्:-** पाणिनिना स्वरचिते अष्टाध्याय्याम् (१.२.२९ सूत्रादारभ्य) स्वरनियमानां विशदालोचना प्रतिपादम्। तेन ***'अनुदात्तं पदमेकवर्जम्'*** इति सूत्रेण स्पष्टिकृतं यत् एकस्मिन् पदे एकः स्वरः एव उदात्तः भवति, शेषाः सर्वे अनुदात्ताः भवन्ति इति। वैदिकस्वरः अवबोधनार्थं पाणिनिय व्याकरणम् संस्कृतसाहित्यजगति अत्यन्तं महत्वपूर्णस्थानं अधिकरोति।

- **प्रातिशाख्यग्रन्थाः-** प्रतचिशाख्यग्रन्थाः स्वराणां मूर्धन्याः संरक्षकाः भवन्ति। ऋक्प्रातिशाख्यं, तैत्तिरीय-प्रातिशाख्यं च विशेषतः स्वरचिह्नाङ्कनं, सन्धिनियमान्, तथा यः वेदानां विकृतिपाठस्य प्रकारं (यथा जटा, माला, शिखा, रेखा, ध्वज-दण्ड-रथ-घनादिक्रमपाठः) स्पष्टयति यस्य मूलं स्वरशुद्धिः एव वर्तते।
- **शिक्षाग्रन्थाः-** पाणिनीयशिक्षायां ***'उदात्तः, अनुदात्तः, स्वरितः'*** इति त्रयः स्वराः शारीरस्थानम् (शिर-हृदय-कण्ठीदिन्) आश्रित्य उच्चार्यन्ते इति उल्लिखितम्। एतत् सर्वं विज्ञानं वैदिकोच्चारणस्य भौतिकआधारं बोधयति।
-

## 4. स्वराणां महत्त्वपूर्णं स्थानम्

***'अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि'*** इत्यनया व्युत्पत्त्या 'अङ्ग' शब्दस्य अर्थः 'उपकारकः' इति। अर्थात् यत्किञ्चिदपि वस्तुस्वरूपज्ञाने साहाय्यं करोति, तदैव 'अङ्गम्' इति कथ्यते। वेदः स्वयमेव कठिनः विषयः अस्ति। वेदार्थानां ज्ञानार्थं यानि शास्त्राणि उपयोगीनि सन्ति, तानि एव वेदाङ्गानि भवन्ति। वेदस्य यथार्थः ज्ञानलाभाय षड्विषयाणां ज्ञानम् अपेक्षितं भवति। वेदमन्त्राणाम् उचितरीत्या उच्चारितस्वरः एव प्रथमावश्यकवस्तुरस्ति। मन्त्राणां यथार्थोच्चारणार्थं प्रवर्तमानं वेदाङ्गं 'शिक्षा' नाम्ना वैदिकवाङ्मये सुप्रसिद्धरिति। अस्मिन् शिक्षावेदाङ्गे स्वरस्य प्रधान्यता सर्वोपरि विराजते इति। अतः अस्मिन् सन्दर्भे स्वराणां महत्वं विषये मया आलोच्यते।

- अर्थभेदकत्वम्:- शब्देषु गूढशक्तिः स्वराघातः शब्दस्य व्याकरणिकं स्थानं निश्चित्य तस्य अर्थं नियन्त्रयति। समानवर्णानाम् शब्दयोरपि स्वरेण महान् अर्थभेदो भवति। समान वर्णयुक्तस्वराणाम् उच्चारणे स्वरभेदः कथं भिन्नार्थं प्रतिपादयति तस्यैक नमूना मया अधरालोच्यते। अत्र 'वृ॒र्षति' तथा 'वर्षति' समानशब्दयोः स्वरभेदे कथम् अर्थभेदः भवति तदैवालोच्यते इति। अतादृशि सारण्यां मया प्रतिपाद्यते-

| शब्दः | स्वर-स्थितिः | व्याकरणिकः वर्गः | अर्थः |
|---|---|---|---|
| वृ॒षति | प्रथमाक्षरे उदात्तः | क्रियापदम् (Verb) | 'सः मेघः वर्षति' |
| वर्षति | अन्तिमाक्षरे उदात्तः | नामपदम् (Noun) | 'वृष्टिः' (The Rain) |

## 5. स्वरोपराधे इन्द्रशत्रुहतरिति उपाख्यानस्य विश्लेषणम्-

प्रसिद्धे वृत्रासुर-उपाख्याने वेदमन्त्राणाम् उच्चारणपद्धतिः अतीव महत्त्वपूर्णा मन्यते। यदि उच्चारणं शुद्धं स्यात् तर्हि यज्ञं कुर्वन् पुरुषः सम्पूर्णं फलं लभते। पक्षान्तरे यदि उच्चारणे अशुद्धिः भवति तर्हि न केवलम् अनुष्ठानं विफलम् भवति, अपितु यजमानस्य महती हानिः अपि जायते। अस्य कथनस्य प्रमाणरूपेण वृत्रासुर-इन्द्रयोः कथा पाणिनीयशिक्षायाम् उदाहृता अस्ति। यदा वृत्रासुरः इन्द्रं हन्तुं यज्ञम् अकरोत्, तदा तस्य मुख्यमन्त्रः ***'इन्द्रशत्रु वर्धस्व'*** इति आसीत्। वृत्रासुरः स्वविजयार्थं (इन्द्रस्य शत्रोः विजयार्थं) मन्त्रम् उच्चारयितुम् इच्छति स्म यत्र तत्पुरुषसमासानुसारेण ***'त्रु'*** वर्णः उदात्तः स्यात्। परन्तु दैववशात् वृत्रासुरः स्वरोच्चारणे दोषम् आचरितम्। सः कर्मधारयसमासानुसारेण आदिवर्णं ***'इ'*** उदात्तं कृत्वा मन्त्रम् उच्चारितवान्। स्वरदोषेऽस्मिन् मन्त्रस्य अर्थः विपरीतम् अभवत्। सः मन्त्रः यः वृत्रासुरस्य विजयं सूचयति स्म, तदैव इन्द्रस्य विजयस्य कारणं अभवत्। अतः वृत्रासुरः न केवलं यज्ञस्य फलं न प्राप्तवान्, अपि तु इन्द्रेण हतः। अतः पाणिनीयशिक्षायाम् अस्य महत्त्वं प्रतिपादयितुं कथितमस्ति यत्- ***"स्वर-दोषेण वा वर्णदोषेण वा अशुद्धतया प्रयुक्तः मन्त्रः कदापि इच्छितम् अर्थं न सिद्धयति। अपितु सः मन्त्रः 'वाग्वज्रः' इव यजमानस्य नाशं करोति। यथा स्वरस्य अपराधेन वृत्रासुरः हतः।"*** [3]

- **अशुद्धोच्चारणम्-** यदा अन्त्ये उदात्तः भवति तदा अर्थः 'इन्द्रस्य शत्रुः' (इन्द्रं हन्तुं समर्थः) इति भवति।
- **शुद्धोच्चारणम्-** यदा प्रथमे उदात्तः स्यात् तदा अर्थः 'इन्द्रो यस्य शत्रुः' (यस्य हन्ता इन्द्रः) इति भवेत्।
- **परिणामः-** स्वरदोषेण वृत्रासुरः इन्द्रं न हन्तुं शक्नोति, अपि तु इन्द्रेण हतः। अतः स्वरदोषः इच्छितस्य फलस्य स्थाने विपरीतं फलं दत्तवान्।

## ध्वनि तथा वाचनशैली

लय-ताल-रक्षणम् स्वराः मन्त्रपाठाय विशिष्टं सङ्गीतमाधुर्यं प्रयच्छन्ति। सामवेदे स्वराणाम् उपयोगः सप्तस्वराणां रूपेण कृतः। यथा संस्कृतवाङ्मये वर्णितोऽस्ति ***"उदात्तस्वरे निषादः गान्धारः, अनुदात्ते ऋषभः धैवतः, स्वरिते षड्जः मध्यमः, पञ्चमादिसप्तस्वराः निहिताः सन्ति"*** [4] इति।

- अखण्ड-परम्परा- स्वराणाम् शुद्धचिह्नाङ्कनं यथा अधोरेखाऊर्ध्वरेखा सुनिश्चितं करोति यत् मन्त्राः गुरुशिष्यपरम्परया सहस्रवर्षेभ्यः अक्षरशः तदैव उच्चारिताः सन्ति। अस्याः स्वराणाम् उच्चारणवेलायां पाठकाः उदात्तानुदात्तादिभेदेन शरिरस्य विभिन्नाङ्गानां स्पर्शोऽपि क्रियते। अतादृशि पाणिनीयशिक्षायां वर्णितोऽस्ति- ***उदात्तस्वरस्य उच्चारणकाले शिरप्रदेशे, अनुदात्ते हृदयप्रदेशे, स्वरिते कर्णमूलेस्तु प्रचये मुखेप्रदेशे*** [5] स्पर्षकृत्वा हस्तमाध्यमे स्वरनिर्देशविधिः प्रचलितोऽस्ति।

**आनुष्ठानिकं तथा आध्यात्मिकं महत्त्वम्**

- फलप्राप्तिः- वेदेषु प्रत्येककर्मं मन्त्रैः सह सम्बद्धम् अस्ति। मन्त्रस्य शक्तिः (मन्त्र-वीजम्) तस्य शुद्धस्वरोच्चारणे निहिता अस्ति। स्वरशुद्धिः एव यज्ञस्य सफलतायै तथा अभीष्टफलप्राप्तये अनिवार्यम् अस्ति।
- देवता-आवाहनम्- स्वराः ध्वन्यात्मकऊर्जां नियन्त्रयन्ति। शुद्धस्वरेण उच्चारितः मन्त्रः विशिष्टं देवत्वं प्रति एवम् आह्वाहनं कर्तुं समर्थः भवति इति।

**6. निष्कर्षः**

वैदिकस्वराघातः भारतीयध्वनिज्ञानस्य उत्कृष्टतमम् उदाहरणमस्ति। उदात्त-अनुदात्त-स्वरित-प्रणाली भाषायाः अर्थं रक्षा करोति एवं मन्त्राणाम् आध्यात्मिकवीजमपि अक्षुर्णं कर्तुं सहायकं भवति। एतत् स्पष्टं यत् वैदिकमन्त्राणां पाठनम्, श्रवणं वा तदैव सफलं भवति यदा स्वरनियमाः पूर्णतया अनुपालिताः भवन्ति। अतः स्वरज्ञानं विद्वत्ता आध्यात्मिकशुद्धेः अपरिहार्यमस्ति इति। शिक्षा वेदाङ्गम् एवं तत्र स्वकरनियमाः वैदिकमन्त्रोच्चारणे अवश्यमेव परिपालनीयः इति। साम्यग्स्वरोच्चारणम् एव अभिष्टमन्त्रफलं प्रदायितुं समर्थः भवति इति।

**अन्त्याटीकाः**

1. *छन्दपादौतु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षु र्निरुक्तं श्रोत्रमुच्यते।।*
*शिक्षा घ्राणं तु वेदस्य मुखं द्याकरणं स्मृतम्। तस्मात् साङ्गमधीतैव ब्रह्मलोके महियते।।,*
-पाणिनीयशिक्षा/ श्लोकः-४१-४२।
2. तत्रैव।
3. *मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तं अर्थमाह।*
*स वाग्-वज्रं यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥,* पाणिनीयशिक्षा- श्लोकः-५२।
4. *उदात्ते निषादगान्धारावनुदात्तः ऋषभ धैवतौ, स्वरितप्रभवा ह्येते षड्ज-मध्यम पञ्चमाः॥,* तत्रैव- श्लोकः-१२।
5. *अनुदात्तो हृदि ज्ञेयो मूर्धन्युदात्त उदाहृतः, स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः॥,* तत्रैव- श्लोकः-४८।

**सहायकग्रन्थसूची**

**प्राचीन-मूल-ग्रन्थाः**

- पाणिनिः, *पाणिनीय-शिक्षा,* विमर्शिताः श्रीमता पट्टाभिरामशास्त्रिणा, श्रीबालाविनोदिनी-टीकासहित, चौखम्बा संस्कृत संस्थानम्, १९९९ ।
- पाणिनिः, *अष्टाध्यायी,* व्याख्याकारः नरेश झा, चौखम्बा सुरभारती प्रकाशनम्, वाराणासी, २०२३।
- शौनकः, *ऋग्वेद-प्रातिशाख्यम्,* सम्पादिताः श्रीमता मङ्गलदेवेन, पुनर्मुद्रणम्, मोतीलाल बनारसीदास, २००६ ।

**आधुनिक-शोध-ग्रन्थाः**

- उपाध्याय, वलदेव, *संस्कृत साहित्य का वृहद् इतिहास (वैदिकखण्डम्),* शारदा नीकेतन, वारणासि, पुनः मुद्रण, १९९०।
- कर, भुवनेश्वर, *संस्कृतसाहित्यर इतिहास (Translation of A.B. Keith ),* ओडिशा राज्य पाठ्यपुस्तक प्रणयन ओ प्रकाशन संस्था, पुस्तक भवन, भुवनेश्वर ,२०१५।
- शतपथी, हरेकृष्णः, *संस्कृतसाहित्यर इतिहास,* किताव महल, पुनः मूद्रणम् २०१५।
- भट्टाचार्य, रमेशचन्द्रः, *वैदिक-स्वर-मीमांसा,* साहित्य अकादेमी, २००१ ।
- शर्मा, बलदेवः । *"शिक्षा-वेदाङ्गे वैदिक-स्वरस्य स्थानम्।"* भारतीय-विद्या-पत्रिका, खण्डः ३२, सङ्ख्या ४ (२०१४): पृ. ३५-४८ ।
- सिंह, अवधेशः, *प्रातिशाख्यानाम् अध्ययनम्* , विद्याभवनम्, १९९२ ।
- द्विवेदी, कपिलदेवः, *शिक्षाशास्त्रस्य इतिहासः,* विश्वभारती प्रकाशनम्, १९८० ।
- वाजपेयी, कृष्णकान्तः, *"उच्चारण-विज्ञानं तथा प्रातिशाख्यम्",* वेद-समीक्षा-पुस्तिका, सम्पादिताः गोविन्दरायमिश्रेण, भागः २, राष्ट्रीय संस्कृत संस्थानम्, २००८, पृ. १००-११५।